ISSN 2454-8596
www.vidhyayanaejournal.org
An International Multidisciplinary Research e-Journal

# रघुवंशमहाकाव्येऽकथितं चेति पाणिनीयसूत्रस्य विनियोगः ।

**Kaushik A Rajyaguru**

ISSN 2454-8596
www.vidhyayanaejournal.org
VIDHYAYANA
An International Multidisciplinary Research e-Journal

**'सामर्थ्ययोगान्नहि किञ्चिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यात्'** इति महाभाष्यकारस्य वचनात् पाणिनीयव्याकरणस्य महत्त्वं दृष्टिगोचरं भवति । **'मुखं व्याकरणं स्मृतम्'** इत्यादिभिः वचनैः ज्ञायते यत् व्याकरणशास्त्रस्य स्थानं वेदाङ्गेषु महत्त्वपूर्णं वर्तते । व्यावहारिकजीवने शब्दस्य व्यापकमहत्ता वर्तते । जगतोऽस्य निबन्धनीशक्तिस्तु शब्देष्वेवाश्रिता । भाषाकीयव्यवहारे शब्दस्योपयुक्तता प्रतिपदं वर्तते । खल्वत्र शब्दस्य प्रयोगोऽर्थगत्यर्थकः । वैयाकरणाः मन्यन्ते यदेतत्प्रकारस्यार्थबोधोऽर्थाभिव्यक्तिर्वा नैकानां शब्दानां समुदायरूप'वाक्येन' जायते, वाक्यतो भिन्नानां शब्दानां न कापि पृथक् सत्ता । वाक्यार्थं ज्ञातुं कारकपरिचयस्य व्यवस्था कृताचार्यैः । खलु षट्सु कारकेषु कर्मकारकस्य 'अकथितं च' सूत्रार्थः विवेच्यतेऽत्र ।

अकथितं प्रथमाविभक्त्यन्तं चेत्यव्ययपदं द्विपदमिदं सूत्रम् । चेत्यनेन 'कर्तुरीप्सिततमं कर्म' इति सूत्रतः कर्म इत्यस्यानुवृत्तिः, कारके इत्यस्याधिकारत्वम् । अर्थात् अकथितस्य कारकस्य कर्मसंज्ञा स्यादिति सामान्यार्थः । उक्तञ्च 'अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात् ।

रघुवंशमहाकाव्ये यत्र यत्र महाकविकालिदासो दुहादीनां परिगणितानां धातूनां प्रयोगं कृतवान् तत्र तत्र यदि तस्य महाकवेर्यदि कर्मयुक्कारकस्य कर्मत्वेनैव विवक्षा स्यात्, अपादानादिभिरविवक्षितं स्याच्चेत्तेषां प्रयोगाणामत्रोल्लेखः कृतः ।

**रघुवंशमहाकाव्ये द्विकर्मकाणां प्रयोगः ।**

रघुवंशमहाकाव्यस्य प्रथमसर्गस्य श्लोकेऽस्मिन् वर्तते प्रयोगः । यथा –

**हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान् ।**
**नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ।। १/४५ ।।**

पृच्छन्तौ–इति **पृच्छधातोः** कृदन्तस्य कर्मद्वयं वर्तते श्लोकेऽस्मिन् । ईप्सिततमं —नामधेयानि˝ इति

ISSN 2454-8596
www.vidhyayanaejournal.org
An International Multidisciplinary Research e-Journal

पदं वर्तते तस्य तु **कर्तुरीप्सिततमं कर्मे**ति पाणिनीयसूत्रेण कर्मसंज्ञा द्वितीयाविभक्तिश्च । —घोषवृद्धानुपस्थितान्˜ इत्यत्र सम्प्रदानत्वेन —घोषवृद्धेभ्य उपस्थितेभ्य˜ इत्यपि भवितुमर्हति । किन्त्वत्र सम्प्रदानस्याविवक्षात: —**अकथितं च**˜ इति सूत्रेण कर्मसंज्ञा भवति । कर्मसंज्ञत्वात् द्वितीयाविभक्तिश्च भवति । तेन घोषवृद्धानुपस्थितान् मार्गशाखिनां नामधेयानि पृच्छन्तौ–इति स्पष्टम् ।

**श्लोकस्थप्रयोग:** – उपस्थितान् घोषवृद्धान् नामधेयानि पृच्छन्तौ ।

**अपादानादिविवक्षात:** – उपस्थितेभ्य: घोषवृद्धेभ्य: नामधेयानि पृच्छन्तौ । इति ।

तत: परम् –

**तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् ।**
**पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनि:** ।। १/५८ ।।

मुनि: राज्याश्रममुनिं कुशलं पप्रच्छ । इति श्लोकस्यास्य मूलवाक्यं वर्तते । अत्र पृच्छ धातो: ईप्सिततमत्वात् कुशलशब्दस्य कर्मकारकं भवति, कर्मकारकत्वात् द्वितीयाविभक्तिश्च । राज्याश्रममुनये इति चतुर्थीविभक्तयन्तसम्प्रदानकारकस्याविवक्षात: **अकथितं चे**ति सूत्रेण भवति तस्य कर्मसंज्ञा, तेन द्वितीया ।

**श्लोकस्थप्रयोग:** – मुनि: राज्याश्रममुनिं कुशलं पप्रच्छ ।

**अपादानादिविवक्षात:** – मुनि: राज्याश्रममुनये कुशलं पप्रच्छ ।

तत: परम् –

**एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन ।**
**शिलोच्चयोऽपि क्षितिपालमुच्चै: प्रीत्या तमेवार्थमभाषतेव** ।। २/५१ ।।

शिलोच्चय: क्षितिपालं तमेवार्थम् अभाषत । ब्रुविस्तु द्विकर्मकेषु पठित: । भाषिरयं ब्रुविसमानार्थकत्वाद् द्विकर्मक: । अत्र क्षितिपालम् अर्थमिति कर्मद्वयम् । शिलोच्चय: तमेवार्थम् अभाषत । अर्थमितीप्सिततमत्वात्

ISSN 2454-8596
www.vidhyayanaejournal.org
VIDHYAYANA
An International Multidisciplinary Research e-Journal

कर्मसंज्ञकम् । सम्प्रदानस्या- विवक्षायां क्षितिपालशब्दस्य कर्मसंज्ञा ।

**श्लोकस्थप्रयोगः** – शिलोच्चयः क्षितिपालं तमेवार्थम् अभाषत ।

**अपादानादिविवक्षातः** – शिलोच्चयः क्षितिपालाय तमेवार्थम् अभाषत ।

ततः परम् –

**तां सैव वेत्रग्रहणे नियुक्ता राजान्तरं राजसुतां निनाय ।**
**समीरणोत्थेव तरङ्गलेखा पद्मान्तरं मानसराजहंसीम् ।। ६/२६ ।।**

सा राजसुतां राजान्तरं निनाय । नयतिर्द्विकर्मकः । सा राजसुतां निनाय । राजान्तरमन्यराजानं निनायेति । राजान्तरमित्यत्राधिकरणस्याविवक्षातः कर्मसंज्ञत्वात् द्वितीयाविभक्तिः ।

**श्लोकस्थप्रयोगः** – सा राजसुतां राजान्तरं निनाय ।

**अपादानादिविवक्षातः** – सा राजसुतां राज्ञः पार्श्वे निनायेति ।

ततः परम् –

**कौशिकेन स किल क्षितीश्वरो राममध्वरविघातशान्तये ।**
**काकपक्षधरमेत्य याचितस्तेजसां हि न वयः समीक्ष्यते ।। ११/१ ।।**

कौशिकेन क्षितीश्वरो रामं याचितः । इति श्लोकस्यास्य प्रधानं वाक्यं वर्तते । याच्धातोः कर्मद्वयमत्र । कर्मणि प्रयोगः । क्षितीश्वरो दशरथः । कौशिकेन क्षितीश्वरात् रामं ययाचे । याचधातोः ईप्सिततमं पदं वर्तते रामेति । ततः तत्पदं प्रधानं वर्तते, क्षितीश्वरेति पदं गौणं स्यात् । **अकथितं चे**ति सूत्रेण रामेति पदस्य भवति कर्मसंज्ञा । कर्मणि वाक्यप्रयोगादत्राप्रधानकर्मणि लकारव्यवस्थातः क्षितीश्वरः कौशिकेन रामं याचितः । इति ।

**श्लोकस्थप्रयोगः** – कौशिकेन क्षितीश्वरः रामं याचितः । (कर्मणि)

**अपादानादिविवक्षातः** – कौशिकेन क्षितीश्वरात् रामं याचितवान् । (कर्तरि)

ततः परम् –

**तौ सुकेतुसुतया खिलीकृते कौशिकाद्विदितशापया पथि ।**
**निन्यतुः स्थलनिवेशिताटनी लीलयैव धनुषी अधिज्यताम् ।।११/१४।।**

तौ धनुषी अधिज्यतां निन्यतुः । इत्यस्य श्लोकस्य वर्तते मुख्यं वाक्यम् । तौ– इति कर्तृपदस्य निन्यतुः इति क्रिययाप्तुमीष्टतमं कारकं वर्तते धनुषी । —अधिज्ये˜ इत्यधिकरणकारकस्य विवक्षां विहाय तत्र कर्मत्वस्य विवक्षा स्यादकथितं चेति सूत्रेण । अतः वाक्येऽस्मिन् भवति कर्मद्वयम् । धनुषी मुख्यं कर्म, अधिज्यतां च गौणकर्म । तौ धनुषी अधिज्यतां निन्यतुरिति शुद्धप्रयोगः ।

**श्लोकस्थप्रयोगः** – तौ धनुषी अधिज्यतां निन्यतुः ।

**अपादानादिविवक्षातः** – तौ धनुषी अधिज्ये निन्यतुः ।

ततः परम्

**स किंवदन्तीं वदतां पुरोगः स्ववृत्तमुद्दिश्य विशुद्धवृत्तः ।**
**सर्पाधिराजोरुभुजोऽपसर्पं पप्रच्छ भद्रं विजितारिभद्रः ।।१४/३१ ।।**

स भद्रं किवदन्तीं पप्रच्छ । स इति कर्तुः पप्रच्छेति क्रिययाप्तुमीष्टतमं कारकं वर्तते किवदन्तीति पदम्, तस्य **कर्तुरीप्सिततमं कर्म** इति सूत्रेण भवति कर्मसंज्ञा, तस्मात् द्वितीयाविभक्तिः । कर्मयुक् पदं वर्तते —भद्रं˜, भद्रात् किंवदन्तीविषयकमुपदेशं जिघृक्षते । तत्र भद्रस्यापादानत्वेनाविवक्षा । अपादानस्याविवक्षातस्तस्य कर्मणः **अकथितं चे**ति सूत्रेण भवति कर्मसंज्ञा । ततो द्वितीया ।

**श्लोकस्थप्रयोगः** – स भद्रं किंवदन्तीं पप्रच्छ ।

**अपादानादिविवक्षातः** – स भद्रात् किंवदन्तीं पप्रच्छ ।

ततः परम्

**भरतस्तत्र गन्धर्वान्युधि निर्जित्य केवलम् ।**
**आतोद्यं ग्राहयामास समत्याजयदायुधम् ।। १५/८८ ।।**

तत्र भरतः युधि गन्धर्वान् निर्जित्य केवलम् आतोद्यं ग्राहयामास, आयुधं समत्याजयत् । भरतो गन्धर्वान् निर्जित्य केवलम् आतोद्यं ग्राहयमास, आयुधं समत्याजयत् । अत्र ग्राहित्यज्योर्ण्यन्तयोर्द्विकर्मकत्वं नित्यमनित्यनुसन्धेयम् ।

**श्लोकस्थप्रयोगः** – भरतः गन्धर्वान् निर्जित्य आतोद्यं ग्राहयमास ।
भरतः गन्धर्वान् निर्जित्य आयुधं समत्याजयत् ।।

**अपादानादिविवक्षातः** – भरतः गन्धर्वात् निर्जित्य आतोद्यं ग्राहयमास ।
भरतः गन्धर्वात् निर्जित्य आयुधं समत्याजयत् ।।

ततः परम्

**स क्षेमधन्वानममोघधन्वा पुत्रं प्रजाक्षेमविधानदक्षम् ।**
**क्ष्मां लम्भयित्वा क्षमयोपपन्नं वने तपः क्षान्ततरश्चचार ।। १८/९ ।।**

VIDHYAYANA

स पुत्रं क्ष्मां लम्भयित्वा इति । लम्भयित्वा प्रापय्येति । —लभेर्गत्यर्थत्वात् द्विकर्मकत्वम्˜ । स पुत्रं क्ष्मायै लम्भयित्वेत्यपादनत्वादीनां विवक्षायां सम्भवति । अपादानादीनामविवक्षायामकथितं चेति सूत्रेण कर्मसंज्ञा, कर्मसंज्ञत्वात् भवति तस्य द्वितीया विभक्तिश्च ।

**श्लोकस्थप्रयोगः** – स पुत्रं क्ष्मां लम्भयित्वा ।

**अपादानादिविवक्षातः** – स पुत्रं क्ष्मायै लम्भयित्वा ।

ततः परम्

**कण्ठसक्तमृदुबाहुबन्धनं न्यस्तपादतलमग्रपादयोः ।**

**प्रार्थयन्त शयनोत्थितं प्रियास्तं निशात्ययविसर्गचुम्बनम् ।। १९/२९ ।।**

प्रियाः तं चुम्बनं प्रार्थयन्ते । ―अर्थनिबन्धनेयं संज्ञा˜ इति सिद्धान्तकौमुद्याः वचनात् याच् धातोः समानार्थकः प्रयोगोऽत्र । क्रिययात्रेप्सिततमं पदं वर्तते ―चुम्बन˜ । तस्य **कर्तुरीप्सिततमं कर्मे**ति सूत्रेण कर्मसंज्ञा । कर्मयुक्तकारकपदस्य अपादानादिभि– रविवक्षितत्वात् कर्मत्वेन च विवक्षातः **―अकथितं चे˜ति** सूत्रेण कर्मसंज्ञा स्यात् । द्वयोः कर्मसंज्ञकपदयोर्द्वितीया विभक्तिः ।

**श्लोकस्थप्रयोगः** – प्रियाः तं चुम्बनं प्रार्थयन्ते ।

**अपादानादिविवक्षातः** – प्रियाः तस्मात् चुम्बनं प्रार्थयन्ते ।

एवमनेन प्रकारेण रघुवंशमहाकाव्ये यत्र यत्र द्विकर्मकधातूनां प्रयोगो दरीदृश्यते, अकथितं चेति सूत्रेण कर्मत्वेन विवक्षा स्यात्, तथा चापादानादिनाविवक्षा स्यात्तेषामेवोदाहरणानां सङ्कलनं कृतम् । तेषामुदाहरणानामपादादिविवक्षायां किं रूपं भवितुमर्हति तस्यापि प्रयोगो प्रतिपादितः । एकोनविंशतिसर्गात्मकेऽस्मिन् महाकाव्ये केषुचिदेव श्लोकेषु सूत्रस्यास्य विनियोगो दृश्यते । विस्तारभयादत्रैव विरमामि ।